# mantrotkIlana vimochana stotrm

# મન્ત્રોત્કીલન વિમોચન સ્તોત્રમ્

## Document Information

Text title : mantrotkIlanavimochanastotram

File name : mantrotkIlanavimochanastotram.itx

Category : devii, dashamahAvidyA, devI, mantra

Location : doc_devii

Proofread by : Aruna Narayanan narayanan.aruna at gmail.com

Description/comments : From Durlabh Stotrani. Shivarahasya.

Latest update : June 17, 2019

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

August 30, 2023

*sanskritdocuments.org*

mantrotkIlana vimochana stotrm

# મન્ત્રોત્કીલન વિમોચન સ્તોત્રમ્

અસ્ય શ્રી સર્વમન્ત્રોત્કીલન મન્ત્રસ્ય મૂલપ્રકૃતિ પુરુષ ઋષિ
અનુષ્ટુપ્ જગતી છન્દઃ શ્રી મહાવિદ્યા દેવતા નિરઙ્કારા
માયાશક્તિઃ હ્રીં હ્રીં બીજં ક્રૌં
કીલકં મમ ક્રિયમાણ સઞ્ચિત જન્મ મરણ સર્વમન્ત્રોત્કીલન–
શાપ વિમોચન દ્વારા ધર્માર્થકામમોક્ષાર્થે જપે વિનિયોગઃ ।

ન્યાસઃ -

હ્રીં બીજોત્કીલનં અઙ્ગુષ્ઠાભ્યાં નમઃ હૃદયાય નમઃ
શ્રીં મન્ત્રોત્કીલનં તર્જનીભ્યાં નમઃ શિરસે સ્વાહા
ક્લીં દેવોત્કીલનં મધ્યમાભ્યાં નમઃ શિખાયૈ વષટ્
ઐં શક્ત્યાત્કીલનં અનામિકાભ્યાં નમઃ કવચાય હું
સૌઃ છન્દોત્કીલનં કનિષ્ઠિકાભ્યાં નમઃ નેત્રત્રયાય વૌષટ્
ક્રૌં ઋષ્યોત્કીલનં કરતલકરપૃષ્ઠાભ્યાં નમઃ અસ્ત્રાય ફટ્

ધ્યાનમ્ -

ચિન્તયન્તીં ચૈતન્યરૂપાં બ્રહ્મબીજામાનન્દકન્દાં
સર્વાન્તરાંશ ચેતયન્તીં તારયન્તીં તાં મન્ત્રજાલૈઃ ।
ચેતયન્તીં પ્રકૃતિપુરુષ બીજમખિલં સઞ્જીવની
મન્ત્રયન્ત્રોત્કીલની સર્વમન્ત્રશાપ વિમોચયન્તી ॥

અથ સ્તોત્રમ્ -

અં આં બ્રહ્મ ઇં ઈં સ્વરૂપી એં ઐં ઉત્કીલની વિમુઞ્ચતી ।
અં અઃ પ્રકાશયન્તી મમ મનાસ્તુ સર્વમન્ત્રસિદ્ધિપ્રદાયિની ॥ ૧
યથા ચ વર્ણરૂપાણિ નામકર્માત્મિકા પરા ।
ત્વયૈતત્સૃજ્યતે સર્વ પાલ્યતે ચ તથૈવ ચ ॥ ૨
સૃષ્ટિસ્થિતિકરી ચૈવ સર્વપ્રલયકારિણી ।
નિરઞ્જનસ્ય દેવસ્ય નામ કર્મવિધાયિની ॥ ૩

બધ્દો વિમુચ્યતે સર્વ ત્વયૈવ બ્રહ્મરૂપિણી ।
ત્વમાધાનન્ત શક્તીનાં પ્રવાહો જાયતે તયા ॥ ૪
સંસ્મૃતાપૂજિતાઽનન્તા યોગિનામપિ સિધ્દિદા ।
ત્વયાબ્રહ્મવિરિઞ્ચાધા ભ્રમન્તે નિજ કર્મણા ॥ ૫
તથૈવ ચ મહાવિષ્ણુઃ સર્વદેવસ્તુતિ તતઃ ।
સા તુષ્ટા સર્વ મન્ત્રાણાં મૃતાનાં ચેતની સદા ॥ ૬
મૃતસઞ્જીવનીશમ્ભો પ્રસાદાચ્છુક્ર સિધ્દિદા ।
બ્રહ્માણ્ડં ચેતયન્તી વિવિધ સુરગણાન્ પ્રમોદૈઃ પ્રીતાઃ ।
સન્દીપયન્તિ નિજગુણ વિતતૈઃ ષડ્ગુણાન્ પ્રેરયન્તી ।
વર્ણાન્દેવાન્ જયન્તી દિતિસુત દમની સાપ્ય હુઙ્કાર કાર્ત્રી
ક્ષેત્રી તસ્યૈવ જાપ્યં સ્વર વિતતનુતાં મોચયેચ્છાય જાતમ્ ॥

ઇદં મહાત્રિપુર સુન્દરી સ્તોત્રં પઠેત્ ભક્ત્યાસ્તુ યો નરઃ ।
સર્વાન્કામાનવાપ્નોતિ સર્વસિધ્દિઃ ભવેત્ ધ્રુવમ્ ॥

ઇતિ શિવરહસ્યે પઞ્ચરાત્રે મધ્યમ સંહિતાયાં
શિવશક્તિ સંવાદે શૈવ વૈષ્ણવ શક્તિ સૌર ગાણપત્ય
મન્ત્રોત્કીલન વિમોચન સ્તોત્રં સમ્પૂર્ણમ્ ॥

Proofread by Aruna Narayanan narayanan.aruna at gmail.com

*mantrotkIlana vimochana stotrm*

pdf was typeset on August 30, 2023

Please send corrections to *sanskrit@cheerful.com*